✧ₓ┈°*❃ ❃*°┈ₓ✧

# શ્રી દુર્ગા સપ્ત શ્લોકી
# Sri Durga Sapta Shloki
in Gujarati

✧ₓ┈°*❃ ❃*°┈ₓ✧

# શ્રી દુર્ગા સપ્ત શ્લોકી

**શિવ ઉવાચ ।**
દેવી ત્વં ભક્તસુલભે સર્વકાર્યવિધાયિનિ ।
કલૌ હિ કાર્યસિદ્ધ્યર્થમુપાયં બ્રૂહિ યત્નતઃ ॥

**દેવ્યુવાચ ।**
શૃણુ દેવ પ્રવક્ષ્યામિ કલૌ સર્વેષ્ટસાધનમ્ ।
મયા તવૈવ સ્નેહેનાપ્યંબાસ્તુતિઃ પ્રકાશ્યતે ॥

અસ્ય શ્રી દુર્ગા સપ્તશ્લોકી સ્તોત્રમંત્રસ્ય નારાયણ ઋષિઃ, અનુષ્ટુપ્ છંદઃ, શ્રી મહાકાળી મહાલક્ષ્મી મહાસરસ્વત્યો દેવતાઃ, શ્રી દુર્ગા પ્રીત્યર્થં સપ્તશ્લોકી દુર્ગાપાઠે વિનિયોગઃ ।

જ્ઞાનિનામપિ ચેતાંસિ દેવી ભગવતી હિ સા ।
બલાદાકૃષ્ય મોહાય મહામાયા પ્રયચ્છતિ ॥ 1 ॥

દુર્ગે સ્મૃતા હરસિ ભીતિમશેષજંતોઃ
સ્વસ્થૈઃ સ્મૃતા મતિમતીવ શુભાં દદાસિ ।
દારિદ્ર્યદુઃખ ભયહારિણિ કા ત્વદન્યા
સર્વોપકારકરણાય સદાર્દ્ર ચિત્તા ॥ 2 ॥

સર્વમંગળમાંગળ્યે શિવે સર્વાર્થસાધિકે ।
શરણ્યે ત્ર્યંબકે ગૌરી નારાયણિ નમોઽસ્તુ તે ॥ 3 ॥

શરણાગતદીનાર્તપરિત્રાણપરાયણે ।
સર્વસ્યાર્તિહરે દેવિ નારાયણિ નમોઽસ્તુ તે ॥ 4 ॥

સર્વસ્વરૂપે સર્વેશે સર્વશક્તિસમન્વિતે ।
ભયેભ્યસ્ત્રાહિ નો દેવિ દુર્ગે દેવિ નમોઽસ્તુ તે ॥ 5 ॥

રોગાનશેષાનપહંસિ તુષ્ટા-
રુષ્ટા તુ કામાન્ સકલાનભીષ્ટાન્ ।
ત્વામાશ્રિતાનાં ન વિપન્નરાણાં
ત્વામાશ્રિતા હ્યાશ્રયતાં પ્રયાંતિ ॥ 6 ॥

સર્વબાધાપ્રશમનં ત્રૈલોક્યસ્યાખિલેશ્વરિ ।
એવમેવ ત્વયા કાર્યમસ્મદ્વૈરિ વિનાશનમ્ ॥ 7 ॥

**ઇતિ શ્રી દુર્ગા સપ્તશ્લોકી ।**

✧ₓ┈┈°*❋ ❋*°┈┈ₓ✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net